# श्रीमध्वाष्टकम्

अज्ञाननाशाय सतां जनानां कृतावताराय वसुन्धरायाम् ।

मध्वाभिधानाय महामहिम्ने हताघसङ्घाय नमोऽनिलाय ॥१॥

येन स्वसिद्धान्तसरोजमद्धा विकसितं गोभिरलं विशुद्धैः ।

दुस्तर्कनीहारकुलं च भिन्नं तस्मै नमो मध्वदिवाकराय ॥२॥

प्रपन्नतापप्रशमैकहेतुं दुर्वादिवादेन्धनधूमकेतुम् ।

निरन्तरं निर्मितमीनकेतुं नमाम्यहं मध्वमुनिप्रतापम् ॥३॥

शान्तं महान्तं नतपादकान्तं कान्तं नितान्तं कलितागमान्तम् ।

स्वान्तं नयन्तं त्रिपुरारिकान्तं कान्तं श्रियो मध्वगुरुं नमामि ॥४॥

पुनाननाम्ने मुरवैरिधाम्ने सम्पूर्णनाम्ने समधीतसाम्ने ।

सङ्कीर्तिताधोक्षजपुण्यनाम्ने नमोऽस्तु मध्वाय विमुक्तिसीम्ने ॥५॥

सन्मानसंसज्जनताशरण्यं सन्मानसं तोषितरामचन्द्रम् ।

सन्मानसन्यस्तपदं प्रशान्तं नमाम्यहं मध्वमहामुनीशम् ॥६॥

संस्तूयमानाय सतां समूहैश्चन्द्रायमानाय चिदम्बुराशेः ।

दीपायमानाय हरिं दिदृक्षोरलं नमो मध्वमुनीश्वराय ॥७॥

गुणैकसिन्धुं गुरुपुङ्गवं तं सदैकबन्धुं सकलाकलापम् ।

मनोजबन्धुं नतपादपद्मं नमाम्यहं मध्वमुनिं वरेण्यम् ॥८॥

मध्वाष्टकं पुण्यतमं त्रिसन्ध्यं पठन्त्यलं भक्तियुता जना ये ।

तेषामभीष्टं प्रतनोति वायुः श्रीमध्वनामा गुरुपुङ्गवोऽयम् ॥९॥

समस्तशास्त्राणि च सम्यगेव कृत्वा हरेः शाश्वतसद्गुणान् यः ।

प्रकाशयामास समस्तयुक्तिभिः श्रीमध्वनामा च सदा प्रसीदताम् ॥१०॥

परमपुरुषश्रीचरणसरोरुहमधुकररूपकमानसमुदितम् ।

गुरुकुलतिलकश्रीमदानन्दतीर्थयोगिवरं सततमहं वन्दे ॥११॥

श्रीमल्लिकुचवंश्येन मध्वाष्टकमुदीरितम् ।

श्रीमत्त्रिविक्रमाख्येन गुर्वनुग्रहकारकम् ॥१२॥

॥ इति कविकुलतिलकश्रीमत्त्रिविक्रमपण्डिताचार्यविरचितं मध्वाष्टकं सम्पूर्णम् ॥